क्रं.नं. ९२

संस्कृत.

महेश्वरभट्टी स्मार्तप्रयोग. याज्ञिक

याज्ञिक

संस्कारप्रकरण.

ग्रं. १८५०

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

3317

(1)

॥ महेश्वरभट्टीस्मार्तप्रयोगप्रारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ प्रणम्यगोपालमनंतमा
द्यंनेत्रंचलानंदितगोपवृंदं। स्मार्त्तप्रयोगंविदधातियत्नाद्धिरण्यकेशीय
विधौमहेशः॥१॥ सत्याषाढमुनिंवंदेसुवर्णकेशसमन्वितं। योनुष्ठेयपदा
र्थानांक्रमकल्पमकल्पयत्॥२॥ यत्कृतांवेदवद्वृत्तिमाद्रियंतेविपश्चित॥
मातृदत्तश्चिरंजीयाद्वृत्तिरूपेणतत्वचित्॥३॥ अथसंस्कारशांतिश्राद्धा
ख्यप्रकरणत्रयेणहिरण्यकेशिसर्वस्मार्तकर्मणांप्रयोगोविधीयते।
तत्राद्येसंस्कारप्रकरणेगर्भाधानादयःसंस्काराःद्वितीयेशांतिप्रकर
णेवास्तुशामनाद्याःशांतयः। तृतीयेश्राद्धप्रकरणेअमावास्यादिश्राद्धा
नेवोच्यंते॥ अथसंस्कारप्रकरणे॥ तत्रतयोर्गर्भाधानंपुंसवनंसीमंतो

(3)

म॰हे॰प्र॰ग॰ग॰

न्नपनजातकर्मनामकर्मान्नप्राशनचौलोपनयनवेदव्रतचतुष्टयगोदानस
मावर्तनविवाहाख्याः पंचदशसंस्कारा निरूप्यंते॥ पितृमेधाख्यसंस्कारस्तु
१ श्राद्धप्रकरणे वक्ष्यते॥ तेषु च संस्कारेषु गर्भाधानाख्यसंस्कारस्य प्राथम्यात्
अनुष्ठानसौकर्याच्च॥ सौत्रक्रममुत्सृज्य गर्भाधानादिक्रमेण संस्काराणां
प्रयोग उच्यते॥ गर्भाधानादिचौलांतसंस्काराणां कालातिक्रमे सति तत्तत्का
लातिक्रमप्रायश्चित्तं कृत्वा उपनयनादयः संस्कारास्त्ववश्यं कर्तव्याइत्य
भिप्रायेण उपनयनमुखेनैव संस्काराणामाम्नानं कृतं सूत्रकृता॥ तथा
चोपनयनमारभ्य गौतमसूत्रं तत्र हरदत्तव्याख्या॥ अगतौ गर्भाधानादि
संस्कारान्विनाप्युपनयनं भवति॥ उपनयनं विना तदुत्तरे संस्कारा नभिभ १
वंतीत्यभिप्रायेण उपनयनमुखेन सूत्रितमाचार्येणेति॥ अथ गर्भाधान

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

प्रयोगः ॥ रजोदर्शनेसति स्त्री रात्रं स्नानं तैलाभ्यंजनं कंकतादिना केश
मार्जनं कज्जलादिना चक्षुषोरंजनं दंतधावनं नीविनिकृंतनं रज्जूकरणं
अंजल्यादिना जलपानमित्येवमादीनि न कुर्यात् ॥ रजोदर्शनात्षोडशदिना
नि ऋतुस्तन्मध्ये आद्यं रात्रित्रयं संक्रांति मावास्याक्षयाहमघामूलदिनं च वि
हाय स्वपत्न्याश्चंद्रानुकूल्येन चतुर्थादियुग्मदिवसे गर्भाधानं कुर्यात् ॥ कर्त्ता स्नानं कृ
तमांगलिकः स्वलंकृतवस्त्राच्छादिते पीठे प्राङ्मुख उपविश्य ॥ स्नातां स्वच्छवस्त्र
कृतपरिधानां भूषणमाल्यानुलेपनैरलंकृतामथ संशिष्टब्राह्मणकृतसंभाषां भा
र्यामस्य दक्षिणत उपविश्याचम्य प्राणानायम्य ॥ ॐ सुमुखश्चैकदंतश्च कपि
लो गजकर्णकः ॥ सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ इत्यादिमंगलश्लोकान्
पठित्वा ॥ लक्ष्मीनारायणाभ्यांनमः ॥ उमामहेश्वराभ्यांनमः ॥ मातापितृभ्यांनमः ॥

(५)

महे० प्रयो०

इष्टदेवताभ्योनमः॥ कुलदेवताभ्योनमः। ग्रामदेवताभ्योनमः। वास्तुदेव
ताभ्योनमः। सर्वेभ्योब्राह्मणेभ्योनमोनमः। ॐ विष्णुर्विष्णुः श्रीमद्भगवतो
२ महापुरुषस्यविष्णोराचिंत्यामितवीर्यस्यशक्त्या। ध्रियमाणयोर्ब्रह्मांडखं
डयोर्मध्येभूमंडलेजंबूद्वीपेभारतवर्षेदंडकारण्येगोदावर्यादक्षिणेदेशे
दृषुपात्तपरशुरामक्षेत्रेअद्यब्रह्मणोद्वितीयपरार्द्धेश्वेतवराहकल्पेवैव
स्वतमन्वंतरेअष्टाविंशतितियुगचतुष्कातिमेकलियुगेप्रथमचरणेविक्र
मशाकेअमुकनाम्निसंवत्सरेअयनेऋतौमासेपक्षेतिथौनक्षत्रेयोगेकर
णेसूर्येचंद्रेदेवगुरौशेषग्रहेषुयथास्थानस्थितेषुसत्सुएवंगुण। विशे
षणविशिष्टायांपुण्यतिथौशुभतिथौन्वेतिपाठेनविविक्तोदेशकालौ २
संकीर्त्यममास्यांभार्यायांप्रतिगर्भसंस्कारातिशयद्वाराअस्यांजनिष्य

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५A)

माणगर्भार्णाबीजगर्भसमुद्भवैनोनिबर्हणद्वारांचश्रीपरमेश्वरप्रीत्यर्थंग
र्भाधानाख्यंकर्मकरिष्ये॥तदंगगणपतिपूजनंपुण्याहवाचनंमातृकापू
जनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यगणपतिंपूजयेत्॥अथावमंत्रादौ
सर्वत्रपठेत्॥ॐगणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्त
मं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं॥इति
मंत्रेणगणपतयेनमइतिनाममंत्रेणवाआवाहनासनपाद्यार्घ्याचमन
स्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणानमस्काराइति
षोडशोपचारैः॥गंधपुष्पधूपदीपनैवेद्याइतिपंचोपचारैर्वागणपतिं
संपूज्यपुष्पांजलिंदत्वा॥वक्रतुंडमहाकायसूर्यकोटिसमप्रभ॥अवि
घ्नंकुरुमेदेवसर्वकार्येषुसर्वदा॥इतिप्रार्थयेत्॥इतिगणपतिपूजा॥

महे॰प्रयो॰ अथपुण्याहवाचनप्रयोगः॥तत्रगर्भाधानादिकर्मस्वादावंतेचकेषुचि
त्पुण्याहवाचनविहितंब्राह्मणानन्नेनपरिविष्यपुण्याहस्वस्तिमृद्धि
३ मितिवाचयित्वेत्यादिनासूत्रकृतातत्रदेवताकांक्षायांन्यासांतरोक्ता
देवताउच्यंते॥गर्भाधानस्यादावंतेचब्रह्मा॥पुंसवनस्यो।भयत्रप्रजापतिः।
सीमंतस्यो।भयत्रधाता॥जातकर्मणउ।भयत्रमृत्युः॥नामकरणस्यादौस
विता।अंतेप्रजापतिः॥आयुर्वर्धापनस्यो।भयत्राग्निरायुष्मान्॥अन्न
प्राशनस्यो।भयत्रसविता॥चौलस्यादौकेशिनः।अंतेप्रजापतिः॥उपन
यनस्यादाविंद्रः॥अंतेश्रद्धामेधे।उपनयनचतुर्थदिवसीयपुण्याहवाच
नेसुश्रवाः॥पुनरुपनयनस्यो।भयत्राग्निः॥ब्रह्मचारीव्रतोपाकरणवि ३
सर्गयोरुभयत्रसविता॥ब्रह्मचारीव्रतलोपप्रायश्चित्तस्यो।भयत्रस

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

विता॥ वेदोपाकरणविसर्गयोरुभयत्रसवित्ता॥ समावर्तनस्योभयत्रश्री
रिंद्रोवा। विवाहस्योभयत्राग्निः॥ औपासनोपक्रमेंतेच्चाग्निः सूर्यप्रजाप
स्थालीपाक तयः॥ दर्शपूर्णमासेस्योभयत्राग्निः॥ वास्तुहोमस्यादौवास्तोष्पतिरंतेप्र
जापतिः। शूलगवस्योभयत्रेशानः। प्रदोषव्रतस्योभयत्रेशानः। नक्षत्र
होमेचोभयत्रनक्षत्रदेवताः॥ आग्रयणस्योभयत्राग्रयणदेवता॥ प्र
त्येकंनवग्रहमखेउभयत्रादित्यादिनवग्रहदेवता॥ तंत्रेणनवग्रहमखे
प्रसादयश्चोभयत्र॥ कूश्मांडहोमेनारायणेन्चोभयत्राग्न्यादयः॥ स
र्पबलेरुभयत्रसर्पाः॥ नक्षत्रेष्टेउभयत्रनक्षत्रदेवताः॥ तडागादुत्स
र्गेरुभयत्रवरुणः॥ एकोद्दिष्टस्योभयत्रप्रजापतिः॥ सूत्रकालेप्रधाम।
अग्न्याधेयेउभयत्राग्न्यादयः॥ अग्निष्टोमेउभयत्रेंद्रः॥ अनादिष्टक

महे॰प्र॰ र्मसुस्सर्वत्रप्रजापतिः॥यद्यपिग्रहकृतप्रकरणेकास्मिंश्चिदेवदेवतानामुपयो
गः॥तथापिप्रकरणांतरेपिकास्मिंश्चिदुपयोगोभविष्यतीतिप्रसंगतःसर्व
४ निरूपिताइत्येवधेयं॥इतिबोधायनोक्ताःपुण्याहदेवताः॥कर्त्ताब्राह्म
णानन्नादिनासंतर्प्यगंधादिनासंपूज्यतान्पुण्याहंवाचयेत्॥ॐमहीद्यौः
पृथिवीचनइमंयज्ञंमिमिक्षतां॥पिपृतान्नोभरीमभिः॥मंत्रावृत्त्यादक्षि
णोत्तरतोभूमिंस्पृष्ट्वा॥ॐओषधयःसंवदंतेसोमेनसहराज्ञा॥यस्मैकरो
तिब्राह्मणस्तंराजन्पारयामसि॥तंदुलपुंजौकृत्वा॥आजिघ्रकलशं
मह्यकुरुधारापयस्वत्यात्वाविशंत्विंदवःसमुद्रमिवसिंधवःसामासह
स्रआभजप्रजयापशुभिःसहपुनर्मोविशताद्रयिः॥मंत्रावृत्त्याकलशौ ४
निधाय॥इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

आसिक्निक्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया॥तीर्थजलेन
स्नपयित्वा॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं।ईश्वरीं२सर्वभूतानां
तामिहोपह्वयेश्रियं॥चंदनपुष्पादिनाभूषितोकृत्वा॥कांडात्कांडात्प्ररो
हंतीपरुषःपरुषःपरि।एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥दूर्वांनिधा
य॥अग्नेरेतश्चंद्र२हिरण्यंअद्भ्यःसंभूतममृतंप्रजासु।तत्संभरंनुत्तर
तोनिधाय।अतिप्रयच्छंदुरितिंतरेयं॥हिरण्यंनिधाय॥अश्वत्थेवोनि
षदनंपर्णेवोवसतिःकृता।गोभाजइत्किलासथयत्सनवथपूरुषं॥
पंचपल्लवान्॥बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य।रास्वरत्नानिदा
शुषे॥रत्नानि॥याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥बृ
हस्पतिःप्रसूतास्तानोमुंचंत्व२हसः॥फलं॥युवासुवासाःपरिवीत

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

आगात्सुउश्रेयान्भवतिजायमानः।तंधीरासःकवयउन्नयंतिस्वाधियोमन
सादेवयंतः॥वस्त्रं॥पूर्णादर्विपरापतसुपूर्णापुनरापत।वस्नेवविक्रीणा
वहाइषमूर्जंशतक्रतो॥तंडुलफलसहितपात्राभ्यामाननेपिधाय।सर्व
त्रप्रतिकलशंमंत्रावृत्तिरुत्तरेसंस्कृत्वा।तत्वायामिब्रह्मणावंदमानस्तदा
शास्तेयजमानोहविर्भिः।अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्र
मोषीः॥उत्तरकलशेवरुणमावाह्य॥वरुणायनमइतिगंधपुष्पधूपदी
पनैवेद्यादिभिःसंपूज्यदक्षिणांदत्वा।ततोदेवताआवाहयेत्॥कलश
स्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः।मूलेतत्रस्थितोब्रह्मामध्येमातृग
णाःस्मृताः।कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा।ऋग्वेदोथयजुर्वेद
सामवेदोह्यथर्वणः।अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः।अत्र

(7A.)

गायत्रीसावित्रीशांतिःपुष्टिकरीतथा।आयांतुममशांत्यर्थंदुरितःक्षय
कारिकाः।सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।आयांतुममशांत्यर्थंदु
रितःक्षयकारकाः।।उत्तरकलशेअक्षतान्क्षिपेत्।।मातृदेवोभव।पितृदे
वोभव।आचार्यदेवोभव।अतिथिदेवोभव।अवनिकृतजानुमंडलःकमलमु
कुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधा
रयित्वा।शिषःप्रार्थयेत्।एताःसत्याआशिषःसंतु।दीर्घानागानद्योगिरय
स्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु।।शिवाआ
पःसंतु।सौमनस्यमस्तु।अक्षतंचारिष्टंचास्तु।गंधाःपांतु।सौमंगल्यंचास्तु।
अक्षताःपांतु।आयुष्यमस्तु।पुष्पाणिपांतु।सौश्रियमस्तु।तांबूलानिपां
तु।ऐश्वर्यमस्तु।दक्षिणाःपांतु।बहुदेयंचास्तु।दीर्घमायुःश्रेयःशांतिःपु

(8)

महे० श०

६

ष्टिस्त्वष्टिश्वास्तु ।। सर्वत्रब्राह्मणेषोरस्त्विति प्रतिवचनं देयं ।। यं कृत्वा सर्ववेदयज्ञ
क्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्त्तंते तमहमोंकारमादिं कृत्वा ऋग्य
जुः सामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाच
यिष्ये । वाच्यतामिति विप्रा वदेयुः ।। उत्तरत्रयथायोगं ।। भद्रं कर्णेभिः शृणु
याम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।। स्थिरैरंगैस्तुष्टुवांसस्तनूभिः । व्य
शेमदेवहितं यदायुः ।। द्रविणोद्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयं
सत् । द्रविणोदावीरवतीमिषंनो द्रविणोदारासते दीर्घमायुः । सविता प
श्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सविता नः सुव
तु सर्वतातिं सविता नो रासतां दीर्घमायुः ।। नवो नवो भवति जायमानोऽन्हां ६
केतुरुषसामेत्यग्रे । भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरति दीर्घमा

Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(8A)

युः॥ [illegible]॥उद्वादिविद्दक्षिणावृंतो।अस्वुर्येअश्वदाः सहत्तेस्सूर्येण॥हिरण्य
दाअमृतत्वंभजंतेवासोदाः सोमप्रतिरंत्तआयुः॥आपउंदंतुजीवसेदीर्घायुत्वा
यवर्चसे।यस्त्वाहृदाकीरिणाभन्यमानोमर्त्यंमर्त्योजोहवीमि।जातवेदोयशो।अ
स्व स्मासुदेहिप्रजारग्नेअमृतत्वंभश्यां।यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृ
णवस्योनं।अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति।संत्वा
सिंचामियजुषाप्रजामायुर्धनंच॥व्रतनियमतपस्वाध्यायक्रतुदमदानी
विशिष्टानांब्राह्मणानांमनःसमाधीयतां।चिप्राः।समाहितमनसस्मः।य
जमानः।प्रसीदंतुभवंतः।प्रसंनास्मः।शांतिरस्तु।पुष्टिरस्तु।तुष्टिरस्तु।वृद्धि
रस्तु।अविघ्नमस्तु।आयुष्यमस्तु।आरोग्यमस्तु॥शिवंकर्मास्तु।कर्मसंमृद्धि
रस्तु।धर्मसमृद्धिरस्तु।वेदसमृद्धिरस्तु।शास्त्रसमृद्धिरस्तु।पुत्रसमृद्धि

(७)

महे॰ प्र॰ रस्तु। [illegible]ष्टिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसंपदस्तु। बहिर्देशो अरिष्ट
निरसनमस्तु। यत्पापंतत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। उत्तरेकर्मण्यविघ्न
७ मस्तु। उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरोत्तराः क्रियाः शुभाः शोभनाः
संपद्यंतां। तिथिकरणमुहूर्तनक्षत्रसंपदस्तु। तिथिकरणमुहूर्तनक्षत्रग्र
हलग्नाधिदेवताः प्रीयंतां। तिथिकरणेमुहूर्तेनक्षत्रेसग्रहेसदैवतेप्रीयेतां।
दु[illegible]र्गाः पां[illegible]ल्यौप्रीयेतां। अग्निपुरोगाविश्वेदेवाः प्रीयेतां। इंद्रपुरो
गामरुद्गणाः प्रीयंतां। ब्रह्मपुरोगाः सर्वेवेदाः प्रीयंतां। विष्णुपुरोगासर्व
पुरोगा देवाः प्रीयेतां। माहेश्वरीउमामातरः प्रीयंतां। वसिष्ठपुरोगाऋषिगणाः
प्रीयंतां। अरुंधतीपुरोगाएकपत्न्यः प्रीयंतां। ऋषयश्छंदांस्याचार्यावेदा ७
देवायज्ञाश्च प्रीयंतां। ब्रह्मचब्राह्मणाश्च प्रीयंतां। श्रीसरस्वत्यौप्रीयेतां।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

भगवतीपुष्टिकरीप्रीयतां।

श्रद्धामेधेप्रीयेतां।भगवतीकात्यायनीप्रीयतां।भगवतीमाहेश्वरीप्रीयतां।भग
वतीतुष्टिकरीप्रीयतां।भगवतीऋद्धिकरीप्रीयतां।भगवतीवृद्धिकरीप्रीयतां।
भगवंतौविघ्नविनायकौप्रीयेतां।भगवान्स्वामीमहासेनःसपत्नीकःससुतःस
पार्षदःसर्वस्थानगतःप्रीयतां।हरिहराहिरण्यगर्भाःप्रीयंतां।सर्वाग्रामदेवताः
प्रीयंतां।सर्वाःकुलदेवताःप्रीयतां।सर्वावास्तुदेवताःप्रीयतां।बहिरपः।हता
ब्रह्मद्विषः।हताःपरिपंथिनः।हतास्यकर्मणो।विघ्नकर्तारः।शत्रवःपराभवं
यांतु।शाम्यंतुघोराणि।शाम्यंतुपापानि।शाम्यंत्वीतयः।शुभानिवर्धंतां।शि
वाआपःसंतु।शिवाऋतवःसंतु।शिवाअग्नयःसंतु।शिवाआहुतयःसंतु।शि
वाओषधयःसंतु।शिवावनस्पतयःसंतु।शिवाअतिथयःसंतु।अहोरात्रेशि
वेस्यातां।निकामिनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयो

(10)

महे॰प्रयोगः

गक्षेमोनः कल्पतां। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता
आदित्यपुरोगाः सर्वेग्रहाः प्रीयंतां। भगवान्नारायणः प्रीयतां। भगवान्पर्जन्यः
८ प्रीयतां। भगवान्स्वामीमहासेनः प्रीयतां। पुण्याहकालान्वाचयिष्ये। वाच्यतां।।
उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि। वृषेववाजीशिशु
मतीरपीत्यासर्वतोनः शकुनेभद्रमावद। विश्वतोनः शकुनेपुण्यमावद। याज्य
यायजंतिप्रत्तिर्वैयाज्याः पुण्यैवलक्ष्मीः पुण्यामेवतल्लक्ष्मींसंभावयतिपुण्यां
लक्ष्मींसंस्कुरुते। यत्पुण्यंनक्षत्रं। तद्बट्कुर्वीतोपव्युषं। यदावैसूर्यउदेति। अ
थनक्षत्रंनैति। यावतितत्रसूर्योगच्छेत्। यत्रजघन्यंपश्येत्। तावतिकुर्वीतय
त्कारीस्यात्। पुण्याहएवकुरुते। तानिवाएतानियमनक्षत्राणि। यान्येवदेवन ८
क्षत्राणि। तेषुकुर्वीतयत्कारीस्यात्। पुण्याहएवकुरुते। महांसहकुंटुबिनेम

(10 A)

हाज्जनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय अमुककर्मकारिणेपुण्या
हंभवंतोब्रुवंतु।इतित्रिर्यजमानाः।ॐपुण्याहमितित्रिर्विप्राः।अत्रपुण्याह
शब्दाः प्रतिवचनेप्रथमैकवचनांताएवप्रयोक्तव्याः तेषांस्वपरत्वात्।स्वस्ति
येवायुमुपब्रुवामहेसोमंस्वस्तिभुवनस्ययस्पतिः।बृहस्पतिंसर्वगणंस्वस्ति
येस्वस्तय आदित्यासोभवंतुनः।आदित्य उदयनीयः पथ्येवेतः स्वस्त्याप्रयं
तिपथ्यांस्वस्तिमभ्युद्यंतिस्वस्त्येवेतः प्रयंतिस्वस्त्फद्यंतिस्वस्त्फद्यंति।स्व
स्तिनइंद्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः।स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः।
स्वस्तिनोबृहस्पतिर्दधातु।अष्टौदेवावसवः सोम्यासः।चतस्रोदेवीरजरा
श्रविष्ठाः।तेयज्ञंपांतुरजसः परस्तात्।संवत्सरीणममृतं स्वस्ति।मह्यमि
सादिअमुककर्मकारिणेस्वस्तिंभवंतोब्रुवंतु।इतित्रिर्यजमानः।ॐस्वस्ति

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai: Joint project

महे॰ प्रयो॰

प्रतिवचंत्रिः॥ ऋध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं। यज्ञो
नपक्कंमधुगोष्वंतराभूतांशोअश्विनोःकाममप्राः।सर्वामृद्धिमृध्नुयामि
१ तितंयैतेजसेव[illegible]परस्तात्सर्यभवंत्येभिर्मध्यतोक्षरैरूपरिष्टाद्गाय
त्र्यात्सर्वतोद्वारस्त्वाहंपरिभूयसर्वामृद्धिमृध्नोत्सर्वामृद्धिमृध्नोतियएवं
वेद।ऋध्यास्महव्यैर्नमसोपसद्य।मित्रंदेवंमित्रधेयंनोअस्तु।अनूरा
धान्हविषावर्धयंतः।शतंजीवेमशरदःसवीराः।त्रीणित्रीणिवैदेवाना
मृद्धानि।त्रीणिछंदांसि।त्रीणिसवनानि।त्रयइमेलोकाः।ऋध्यामे
वत्तदृद्धीर्यएषुलोकेषुप्रतितिष्ठति।मह्यमित्यादिअमुककर्मकारिणे १
ऋद्धिंभवंतोब्रुवंतु।इतित्रीः।ॐऋद्धिरितिप्रतिवचनंत्रिः॥श्रियेजातः

"Joint project of Rajawade Samshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com